श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीकोमलवल्लीसुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकोमलवल्लीसुप्रभातम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

हेमापगातटविभूषणकुम्भघोणे
हेमाभिधानमुनिनाथतपः प्रभावात्।
हेमाब्जिनीकनकपङ्कजमध्यजाते !
हे ! मातराश्रितहिते ! तव सुप्रभातम्॥ 1॥

नाथो नतौघनयनामृततां गतोऽयम्
आदौ त्वदीयमुखपद्मविलोकनाय।
बद्धादरः फणिपतौ ननु मीलिताक्षः
श्रीशार्ङ्गपाणिदयिते ! तव सुप्रभातम्॥ 2॥

माता तवाम्ब ! शुभशीतलमन्दवातैः
आश्लिष्टशीकरकणाकृतिरादरेण।
द्वारान्तिकं किल कवेरसुता प्रपन्ना
श्रीशार्ङ्गपाणिदयिते ! तव सुप्रभातम्॥ 3॥

श्रीकुम्भघोणनगरीं तव मातरेनां
त्वन्मातुरेव सरसामृतसंवृताङ्गीम्।
सा ब्रह्मपूरियमिहेति परं विदन्ति
श्रीशार्ङ्गपाणिदयिते ! तव सुप्रभातम्॥ 4॥

श्रीकुम्भघोणनगरीममृतं वहन्तीं
त्वद्वीक्षयातिमधुरं विबुधाः परीताः।
भोक्तुं समाहितधियश्शुचयो वसन्ति
श्रीशार्ङ्गपाणिदयिते ! तव सुप्रभातम्॥ **5**॥

पुष्पाणि नैकविधवर्णमनोहराणि
त्वत्पादपङ्कजसमागमलोलुपानि।
आदाय भक्तनिवहास्समुपागतास्ते
श्रीशार्ङ्गपाणिदयिते ! तव सुप्रभातम्॥ **6**॥

श्रीकोमलाम्ब ! कनकाम्बुजजातमूर्ते !
श्रीकुम्भघोणनगरीतिलकायमाने !।
श्रीहेमयोगिवरपुण्यकृतावतारे !
श्रीशार्ङ्गपाणिदयिते ! तव सुप्रभातम्॥ **7**॥

मातर्मधोरपि रिपोर्मधुरे ! नितान्तं
मान्ये ! मनोहरमुखाम्बुजसेवनीये !।
मारारिमौलिधृतपादसरोजयुग्मे !
मानातिलङ्घिविभवे ! तव सुप्रभातम्॥ **8**॥

प्राग्द्वारतश्च भगवानथ पश्चिमाच्च
द्वारान्निजेन नयनेन दिवाकरेण।
आलोकते तव वपू रजनीकरेण
श्रीशार्ङ्गपाणिदयिते ! तव सुप्रभातम्॥ **9**॥

श्रीहर्षकृत् स्यामिति नाथक्लृप्त -
श्रीपुष्पवर्षेण विराजमाने !।
सामर्षभृङ्गाकुलकेशपाशे !
हेमर्षिकन्ये ! तव सुप्रभातम्॥ **10**॥

सुधानिधिसमुत्थिते ! सुमसमूहसंमण्डिते !
    सुधाकरसहोदिते ! सुमशरस्य माता रमे ! ॥
सुधाभिधसहस्थिते ! सुतनुसङ्घरत्नायिते !
    सुरासुरनमस्कृते ! सुखपदं कुरुष्वानतम् ॥ **11** ॥

कोमलं कोमलाम्बायाः
    सुप्रभातं प्रभान्वितम् ।
पठन्तः श्रीनिधेर्जातं
    भवन्ति श्रीदृशां पदम् ॥ **12** ॥

॥ इति श्रीकोमलवल्लीसुप्रभातं समाप्तम् ॥